# viShNukRitaM shivastotram

# વિષ્ણુકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : shivastotramviShNu

File name : shivastotramviShNu.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Source : Bhagavatam 5.17.17-24, Devi Bhagaatam 8.8.12-19

Latest update : February 28, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2021

*sanskritdocuments.org*

# viShNukRitaM shivastotram

# વિષ્ણુકૃતં શિવસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

શ્રીભગવાનુવાચ ।
ૐ નમો ભગવતે મહાપુરુષાય સર્વગુણસઙ્ખ્યાનાયાનન્તાયાવ્યક્તાય નમ ઇતિ ॥ ૧॥

ભજે ભવાન્યા રણપાદપઙ્કજં ભગસ્ય કૃત્સ્નસ્ય પરં પરાયણમ્ ।
ભક્તેષ્વલં ભાવિતભૂતભાવનં ભવાપહં ત્વા ભવભાવમીશ્વરમ્ ॥ ૨॥

ન યસ્ય માયાગુણચિત્તવૃત્તિભિર્નિરીક્ષતો હ્યણ્વપિ દૃષ્ટિરજ્યતે ।
ઈશે યથા નોઽજિતમન્યુરંહસાં કસ્તં ન મન્યેત જિગીષુરાત્મનઃ ॥ ૩॥

અસદ્દૃશો યઃ પ્રતિભાતિ માયયા ક્ષીબેવ મધ્વાસવતામ્રલોચનઃ ।
ન નાગવધ્વોઽર્હણ ઈશિરે હ્રિયા યત્પાદયોઃ સ્પર્શનધર્ષિતેન્દ્રિયાઃ ॥ ૪॥

યમાહુરસ્ય સ્થિતિજન્મસંયમં ત્રિભિર્વિહીનં યમનન્તમૃષ્ટયઃ ।
ન વેદસિદ્ધાર્થમિવ ક્વચિત્સ્થિતં ભૂમણ્ડલં મૂર્ધસહસ્રધામસુ ॥ ૫॥

યસ્યાદ્ય આસીદ્ગુણવિગ્રહો મહાન્વિજ્ઞાનધિષ્ણ્યો ભગવાનજઃ કિલ ।
યત્સમ્ભવોઽહં ત્રિવૃતા સ્વતેજસા વૈકારિકં તામસમૈન્દ્રિયં સૃજે ॥ ૬॥

એતે વયં યસ્ય વશે મહાત્મનઃ સ્થિતાઃ શકુન્તા ઇવ સૂત્રયન્ત્રિતાઃ ।
મહાનહં વૈકૃતતામસેન્દ્રિયાઃ સૃજામ સર્વે યદનુગ્રહાદિદમ્ ॥ ૭॥

યન્નિર્મિતાં કર્હ્યપિ કર્મપર્વણીં માયાં જનોઽયં ગુણસર્ગમોહિતઃ ।
ન વેદ નિસ્તારણયોગમઞ્જસા તસ્મૈ નમસ્તે વિલયોદયાત્મને ॥ ૮॥

ઇતિ શ્રીમદ્ભાગવતાન્તર્વર્તિ વિષ્ણુકૃતં શિવસ્તોત્રં સમાપ્તમ્ ॥

એવં ચ શ્રીમદ્ભાગવતાન્તર્ગતે પઞ્ચમસ્કન્ધે સપ્તદશોઽધ્યાયઃ ૧૭-૩૪

Proofread by PSA Easwaran

*viShNukRitaM shivastotram*

pdf was typeset on September 12, 2021

Please send corrections to *sanskrit@cheerful.com*